गुरुत्वम्। श्वासवमिश्रमश्रमहरत्वम्। हिक्कापनोदत्वमत्वम्। ग्राहित्वम्। रुचिप्रदत्वम्। ततः सर्व्वदा सेव्यम्। इति राजनिर्घण्टः॥

"कपित्थमामं कण्ठघ्नं विषघ्नं ग्राहि वातलम्।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्"॥
इति राजवल्लभः॥ (तथा च चरके॥
"कपित्थं विषकण्ठघ्नमामं संग्राहि वातलम्॥
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्।
परिपक्वं सदोषघ्नं विषघ्नं ग्राहि गुर्व्वपि"॥
"कुशद्वीपेश्वरस्य राज्ञो ज्योतिष्मत्संज्ञकस्य सप्तपुत्त्राणामेकतमः। तद्वर्षमपि तन्नाम्ना ख्यातम्। तद्विवरणन्तु विष्णुपुराणे २ यांशे ४ अध्याये द्रष्टव्यम्")

कपित्थत्वक्, स्त्री, (कपित्थस्य मालूरस्य त्वगिव त्वग् यस्य।) एलवालुकम्। इति राजनिर्घण्टः॥ (एलवालुकशब्देऽस्य विशेषगुणा ज्ञातव्याः॥)

कपित्थपर्णी, स्त्री, (कपित्थस्य पर्णमिव पर्णं यत्र यस्याः। कपित्थपर्ण+गौरादित्वात् ङीष्।) वृक्षविशेषः। कपित्थानीति ख्याता। तत्पर्य्यायः। विरजा २ सुरसा ३ चित्रपत्रिका ४। इति रत्नमाला॥

कपित्थास्यः, पुं, (कपित्थवत् कपित्थफलवत् वर्त्तुलाकारं आस्यं मुखं यस्य।) वानरविशेषः। तत्पर्य्यायः। गोलाङ्गूलः २ दधिशोणः ३ नगाटनः ४। इति त्रिकाण्डशेषः॥

कपिध्वजः, पुं, (कपिर्हनूमान् ध्वजे यस्य सः। प्रतिज्ञापालनपरतन्त्रेण महावीरेण हनूमताधिष्ठितध्वजत्वात् वानरलाञ्छनध्वजत्वाद्वा तथात्वम्।) अर्ज्जुनः। इति त्रिकाण्डशेषः॥

(यथा गीतायाम्। १। २०।
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः"॥)

कपिनामा, [न्] पुं, (कपेर्नामैव नाम यस्य।) सिह्लकः। इति रत्नमाला॥ (स्वार्थे कन् प्रत्ययेनास्य प्रमाणमुक्तं भावप्रकाशे यथा,—
"कपितैलञ्च संख्यातं तथा च कपिनामकः"॥)

कपिपिप्पली, स्त्री, (कपिः कपिवत् रक्तवर्णा पिप्पलीव रक्तवर्णपिप्पलीतुल्येति यावत्।) रक्तापामार्गः। इति वैद्यकम्॥ सूर्य्यावर्त्तवृक्षः। इति रत्नमाला॥

कपिप्रभा, स्त्री, (कपिष्वपि प्रभा निजप्रभूतगुणप्रसारणं यस्याः। कपीनामपि कण्डूयनादस्यास्तथात्वम्।) कपिकच्छूः। इति शब्दरत्नावली॥

कपिप्रभुः, पुं, (कपीनां हनूमदादीनां प्रभुः नियन्ता।) रघुनाथः। इति शब्दरत्नावली॥ (वानरराजः वाली सुग्रीवश्च॥)

कपिप्रियः, पुं, (कपीनां प्रियः।) आम्रातकः। इति राजनिर्घण्टः॥ कपित्थः। इति जटाधरः॥

कपिरथः, पुं, (कपिर्हनूमान् रथ इव वहनकारी वाहनं वा यस्य।) श्रीरामः। इति शब्दरत्नावली॥ (कपिः महावीरः हनूमान् रथे यस्य इति व्युत्पत्त्या कपिलाञ्छितध्वजः अर्ज्जुनः॥)

कपिलः पुं, (कपु वर्णे "कमेः पश्च"। उणां १।
५६। इलच्। पश्चान्तादेशः।) मुनिविशेषः। स तु ज्ञानभक्तिसांख्ययोगप्रचारार्थंभगवदवतारः। कर्द्दमप्रजापतेरौरसाद्देवहूतिगर्भजातः। इति श्रीभागवतम्॥ (यथा गीतायां १०। २६।
"गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः"॥
सगरराजसन्ततिध्वंसकारी रसातलस्थः कपिलो मुनिः केषाञ्चिन्मते साङ्ख्ययोगप्रचारकर्त्ता न। अयन्तु अपरः कश्चित् स्वनामख्यातो मुनिः। एतदर्थे प्रमाणं यथा, रघुः ३। ५०।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः"॥)

अग्निः। कुक्कुरः। इति हेमचन्द्रः॥ सिह्लकनामगन्धद्रव्यम्। इति रत्नमाला॥ पिङ्गलवर्णः। तद्युक्ते त्रि। इत्यमरः। १। ५। १६—१९॥ नीलपीतः। कपिलः। इति रभसः॥ "कपिलो रोचनाच्छविरित्यन्ये"। इतिभरतः॥ (यथा, महाभारते ३। ३। २४।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः"॥
महादेवः। यथा तत्रैव १२। १७। ६७।
"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥
विष्णुः। यथा तत्रैव १३। १४९। १०६।
"सनात्सनातनतमः कपिलः कपिरव्ययः"॥
नागविशेषः। यथा, हरिवंशे ३। ११४।
"शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा"॥
दानवभेदः। यथा तत्रैव ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा"॥)

कपिलद्युतिः, पुं, (कपिला रक्ता पिङ्गलवर्णा वा द्युतिः यस्य।) सूर्य्यः। इति शब्दचन्द्रिका॥

कपिलद्राक्षा, स्त्री, (कपिला द्राक्षा।) द्राक्षाविशेषः। तत्पर्य्यायः। मृद्वीका २ गोस्तनी ३ कपिलफला ४ अमृतरसा ५ दीर्घफला ६ मधुवल्ली ७ मधुफला ८ मधुली ९ हरिता १० हारहूरा ११ सुफला १२ मृद्वी १३ हिमोत्तरा १४ पथिका १५ हैमवती १६ शतवीर्य्या १७ काश्मरी १८। अस्या गुणाः। मधुरत्वम्। शीतलत्वम्। हृद्यत्वम्। मदहर्षदातृत्वम्। दाहमूर्च्छाज्वरश्वासतृष्णाहृल्लासनाशित्वञ्च। इति राजनिर्घण्टः॥ (मृद्वीकाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

कपिलद्रुमः, पुं, (कपिलः कपिलवर्णो द्रुमः।) काञ्चीनामसुगन्धिकाष्ठम्। इति शब्दचन्द्रिका॥

कपिलधारा, स्त्री, (कपिलानां धारा इव दुग्धधारासदृशी शुद्धा धारा यस्याः। यद्वा कपिलानां दुग्धधाराभिः सम्भूता निर्म्मला धारा यस्याः। संज्ञायां ङ्यापोरिति पाणिनिसूत्रानुसारेण ह्रस्वः।) स्वर्गङ्गा। तीर्थभेदः। इति हेमचन्द्रः॥

कपिलशिंशपा, स्त्री, (कपिला रक्तपीतमिश्रितवर्णा शिंशपा।) शिंशपावृक्षविशेषः। तत्पर्य्यायः। कपिला २ पीता ३ सारिणी ४ कपिलाक्षी ५ भस्मगर्भा ६ कुशिंशपा ७। अस्या गुणाः। तिक्तत्वम्। शीतवीर्य्यत्वम्। आमयवातपित्तज्वरच्छर्द्दिहिक्कानाशित्वञ्च इति राजनिर्घण्टः॥

कपिला, स्त्री, (कपिलो वर्णोऽस्त्यस्याः अर्श आद्यच्। टाप् च।) पुण्डरीकनामदिग्गजपत्नी। इत्यमरः।
१। ३। ४॥ भस्मगर्भा शिंशपा। रेणुकानाम गन्धद्रव्यम्। इत्यमरः। २। ६३—१२०॥ (यथाह राजवल्लभः।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका"॥
अस्या गुणादिकं रेणुकाशब्दे द्रष्टव्यम्॥) गोविशेषः॥ इति हेमचन्द्रः॥ सा तु स्वर्णवर्णा। इति पुराणम्॥ (यथा, महाभारते ३। ८४। ८२।
"कपिला सहवत्सा वै पर्व्वते विचरत्युत"॥
दक्षकन्या। यथा, महाभारते १। ६५। १२॥
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥
कपिलवर्णयोगात्। अनुदात्तत्वाभावात् वर्णादिति न ङीष्।) गृहकन्या। शिंशपा। राजरीतिः इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—
"कज्जला चलशैलात्तु पूर्व्वस्मिन् शुभपर्व्वतः।
शच्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः॥
तत्पूर्व्वस्यां महादेवी नदी कपिलसंज्ञिता।
तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात्"॥
इति कालिकापुराणे ८१ अध्यायः॥ (तीर्थविशेषः। यथा, महाभारते ३। ८३। ४५।
"कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः।
तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि।
कपिलानां सहस्रस्य फलं विन्दति मानवः"॥
कपिलानां पयस्विनीधेनूनाम् इत्यर्थः॥ पिङ्गलवर्णा। यथा, विष्णुपुराणे २यांशे। ४। ३१।
"कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्"॥
कपिला कन्या गोपयन्तव्या यदुक्तं मनुना ३। ८।
"नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्"॥)

कपिलाक्षी, स्त्री, (कपिलं अक्षि तद्वत् पुष्पं यस्याः।) मृगेर्व्वारुः। कपिलशिंशपा। इति राजनिर्घण्टः॥

कपिलाश्वः, पुं, (कपिलाः कपिलवर्णाः अश्वाः यस्य।) इन्द्रः। इति त्रिकाण्डशेषः॥

कपिलोमफला, स्त्री, (कपिलोमस्वपि फलति कण्डूप्रदानाय प्रभवति या।) कपिकच्छूः। इति राजनिर्घण्टः॥ (शूकशिम्बीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिलोमा, स्त्री, (कपिलोमवत् लोममञ्जरी यस्याः।) रेणुका। इति राजनिर्घण्टः॥ (विवृतिस्तु रेणुकाशब्दे द्रष्टव्या॥)

कपिलोहं, स्त्री, (कपिरिव कपिवर्णतुल्यं लोहम्।) पित्तलम्। इति हेमचन्द्रः॥ (पित्तलशब्देऽस्य गुणा ज्ञातव्याः॥)

कपिवल्लिका, स्त्री, (कपिवर्णा वल्लिका। पृषोदरादित्वात् वलोपे साधुः।) गजपिप्पली। इति रत्नमाला॥ (गजपिप्पलीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिवक्त्रः, (कपेर्वानरस्य वक्त्रमिव वक्त्रं यस्य भागिनेयपर्व्वतमुनिशापप्रभावात् मातुलस्य देवर्षेस्तथात्वम्।) नारदः। इति त्रिकाण्डशेषः॥ (यथा हि नारदस्य कपिवक्त्रत्वं जातम् तदुच्यते।

पुरा किल मातुलभागिनेयौ द्वावृषिसत्तमौ नारदपर्व्वतौ मानुषेषु सम्प्रीत्या विहर्त्तुकामौ देवलोकादिहागतवन्तौ। आगत्य च सृञ्जयं राजानमभ्येत्य तद्राज्ये ऊषतुः। आसीच्च